# ॥ દત્તપ્રબોધઃ ॥

.. dattaprabodhaH ..

sanskritdocuments.org

August 20, 2017

# .. dattaprabodhaH ..

## ॥ દત્તપ્રબોધઃ ॥

## Sanskrit Document Information


Text title : dattaprabodhaH

File name : dattaprabodhaH.itx

Category : deities_misc, dattatreya, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : Shri Vasudevanandasarasvati

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : February 10, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


August 20, 2017

*sanskritdocuments.org*

# ॥ દત્તપ્રબોધઃ ॥

શ્રીગણેશાય નમઃ ॥

નિત્યો હિ યદ્ય મહિમા ન હિ માનમેતિ
  સ ત્વં મહેશ ભગવન્મઘવન્મુખેડ્ય ।
ઉત્તિષ્ઠ તિષ્ટદમૃતૈરમૃતૈરિવોક્તૈ-
  ર્ગીતાગમૈશ્ચ પુરુધા પુરુધામશાલિન્ ॥ ૧॥

ભક્તેષુ જાગૃહિ મુદા હિમુદારભાવં
  તલ્પં વિધાય સવિશેષવિશેષહેતો ।
યઃ શેષ એષ સકલઃ સકલઃ સ્વગીતૈ-
  સ્ત્વં જાગૃહિ શ્રિતપતે તપતે નમસ્તે ॥ ૨॥

દૃષ્ટ્વા જનાન્ વિવિધકષ્ટવશાન્દયાલુ-
  સ્ત્ર્યાત્મા બભૂવ સકલાર્તિહરોઽત્ર દત્તઃ ।
અત્રેર્મુનેઃ સુતપસોઽપિ ફલં ચ દાતું
  બુદ્ધ્યસ્વ સ ત્વમિહ યન્મહિમાનિયત્તઃ ॥ ૩॥

આયાત્યશેષવિનુતોઽપ્યવગાહનાય
  દત્તોઽધુનેતિ સુરસિન્ધુરપેક્ષતે ત્વામ્ ।
ક્ષેત્રે તથૈવ કુરુસંજ્ઞક એત્ય સિદ્ધા-
  સ્તસ્થુસ્તવાચમનદેશ ઇનોદયાત્પ્રાક્ ॥ ૪॥

સન્ધ્યામુપાસિતુમજોઽપ્યધુના ગમિષ્ય-
  ત્યાકાઙ્ક્ષતે કૃતિજનઃ પ્રતિવીક્ષતે ત્વામ્ ।
કૃષ્ણાતટેઽપિ નરસિંહસુવાટિકાયાં
  સારાર્તિકઃ કૃતિજનઃ પ્રતિવીક્ષતે ત્વામ્ ॥ ૫॥

ગાન્ધર્વસંજ્ઞકપુરેઽપિ સુભાવિકાસ્તે
  ધ્યાનાર્થમત્ર ભગવાન્સમુપૈષ્યતીતિ ।
મત્વાસ્થુરાચરિતસન્નિયતાપ્લવાદ્યા
  ઉત્તિષ્ઠ દેવ ભગવન્નત એવ શીઘ્રમ્ ॥ ૬॥

પુત્રી દિવઃ ખગગણાન્ સુચિરં પ્રસુપ્તા-
  નુત્પાતયત્યરુણગા અધિરુહ્ય તૂષાઃ ।

કાષાયવસ્ત્રમપિધાનમપાવૃણૂધ-
    ન્તાર્ક્ષ્યાગ્રજોઽયમવલોકય તં પુરસ્તાત્ ॥ ૭॥

શાટીનિભાભ્રપટલાનિ તવેન્દ્રકાષ્ઠા-
    ભાગં યતીન્દ્ર રુરુધુર્ગરુડાગ્રજોઽતઃ ।
અસ્માભિરીશ વિદિતો હ્યુદિતોઽયમેવં
    ચન્દ્રોઽપિ તે મુખરુચિં ચિરગાં જહાતિ ॥ ૮॥

દ્વારેઽર્જુનસ્તવ ચ તિષ્ઠતિ કાર્તવીર્યઃ
    પ્રહ્લાદ એષ યદુરેષ મદાલસાજઃ ।
ત્વાં દ્રષ્ટુકામ ઇતરે મુનયોઽપિ ચાહ-
    મુત્તિષ્ઠ દર્શય નિજં સુમુખં પ્રસીદ ॥ ૯॥

એવં પ્રબુદ્ધ ઇવ સંસ્તવનાદભૂત્સ
    માલાં કમણ્ડલુમધો ડમરું ત્રિશૂલમ્ ।
ચક્રં ચ શઙ્ખમુપરિ સ્વકરૈર્દધાનો
    નિત્યં સ મામવતુ ભાવિતવાસુદેવઃ ॥ ૧૦॥

ઇતિ વાસુદેવાનન્દસરસ્વતીવિરચિતો દત્તપ્રબોધઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. dattaprabodhaH ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*